इन्द्रकीलः कामगिरिरिति चान्ये च शतसहस्रशः शैलास्तेषां नितम्बप्रभवा नदा नद्यश्च सन्त्यसंख्याताः। एतासामपो भारत्यः प्रजा नामभिरेव पुनन्तीनामात्मना चोपस्पृशन्ति चन्द्रवशा ताम्रपर्णी अवटोदा कृतमाला वैहायसी कावेरी वेणा पयस्विनी शर्करावर्त्ता तुङ्गभद्रा कृष्णावेण्या भीमरथी गोदावरी निर्विन्ध्या पयोष्णी तापी रेवा सुरसा नर्म्मदा चर्म्मण्वती अन्धः शोणश्च नदौ महानदी वेदस्मृतिरृषिकुल्या त्रिसामा कौशिकी मन्दाकिनी यमुना सरस्वती दृशद्वती गोमती सरयूरोघवती सप्तवती सुषोमा शतद्रुश्चन्द्रभागा मरुद्वृधा वितस्ता असिक्नी विश्वेति महानद्यः। अस्मिन्नेव वर्षे पुरुषैर्लब्धजन्मभिः शुक्ललोहितकृष्णवर्णेन स्वारब्धेन कर्म्मणा दिव्यमानुषनारकगतयो बह्व्य आत्मन आनुपूर्व्येण सर्व्वा ह्येव सर्व्वेषां विधीयन्ते। यथावर्णविधानमपवर्गश्चापि भवति। योऽसौ भगवति सर्व्वभूतात्मन्यनात्म्येऽनिरुक्तेऽनिलयने परमात्मनि वासुदेवे अनन्यनिमित्तभक्तियोगलक्षणो नानागतिनिमित्ताविद्याग्रन्थिरन्धनद्वारेण यदा हि महापुरुषपुरुषप्रसङ्गः। एतदेव हि देवा गायन्ति।

"अहो बतैषां किमकारि शोभनं
प्रसन्न एषां स्विदुत स्वयं हरिः।
यैर्जन्म लब्धं नृषु भारताजिरे
मुकुन्दसेवौपयिकं स्पृहा हि नः॥
किं दुष्करैर्नः क्रतुभिस्तपोव्रतै-
र्दानादिभिर्वा द्युजयेन फल्गुना।
न यत्र नारायणपादपङ्कज-
स्मृतिः प्रमुष्टातिशयेन्द्रियोत्सवात्॥
कल्पायुषां स्थानजयात् पुनर्भवात्
क्षणायुषां भारतभूजयो वरः।
क्षणेन मर्त्येन कृतं मनस्विनः
संन्यस्य संयान्त्यभयं पदं हरेः॥
न यत्र वैकुण्ठकथा सुधापगा
न साधवो भागवतास्तदाश्रयाः।
न यत्र यज्ञेशमखा महोत्सवाः
सुरेशलोकोऽपि न वै स सेव्यताम्॥
प्राप्ता नृजातिन्त्विह ये च जन्तवो
ज्ञानक्रियाद्रव्यकलापसम्भृताम्।
न वै यतेरन्नपुनर्भवाय ते
भूयो वनौका इव यान्ति बन्धनम्॥
यैः श्रद्धया बर्हिषि भागशो हवि-
र्निरुप्तमिष्टं विधिमन्त्रवस्तुतः।
एकः पृथङ्नामभिराहुतो मुदा
गृह्णाति पूर्णः स्वयमाशिषां प्रभुः॥
सत्यं दिशत्यर्थितमर्थितो नृणां
नैवार्थदो यत् पुनरर्थिता यतः।
स्वयं विधत्ते भजतामनिच्छता-
मिच्छापिधानं निजपादपल्लवम्॥
यद्यत्र नः स्वर्गसुखावशेषितं
स्विष्टस्य सूक्तस्य कृतस्य शोभनम्।
तेनाजनाभे स्मृतिमज्जन्मनः स्या-
द्वर्षे हरिर्यद्भजतां शं तनोति॥

श्रीशुक उवाच। जम्बूद्वीपस्य च राजन्नुपद्वीपानष्टौ हैक उपदिशन्ति सगरात्मजैरश्वान्वेषण इमां महीं परितो निखनद्भिरुपकल्पितान्। तद्यथा। स्वर्णप्रस्थश्चन्द्रशुक्ल आवर्त्तनो रमणको मन्दहरिणः पाञ्चजन्यः सिंहलो लङ्केति। एवं तव भारतोत्तम जम्बुद्वीपवर्षविभागो यथोपदेशमुपवर्णितः।" इति श्रीभागवते महापुराणे ५ स्कन्धे द्वीपवर्षवर्णनं नाम १९ अध्यायः॥
( विष्णुपुराणे च। २ अंशे ३ अध्याये।
"उत्तरं यत् समुद्रस्य हिमाद्रेश्चैव दक्षिणम्।
वर्षं तत् भारतं नाम भारती यत्र सन्ततिः॥१॥
नवयोजनसाहस्रो विस्तारोऽस्य महामुने!।
कर्म्मभूमिरियं स्वर्गमपवर्गञ्च गच्छताम्॥"२॥
अपरञ्च।
"अतः संप्राप्यते स्वर्गो मुक्तिमस्मात् प्रयान्ति वै।
तिर्य्यक्त्वं नरकञ्चापि यान्त्यतः पुरुषा मुने!॥४॥
इतः स्वर्गञ्च मोक्षञ्च मध्यमन्तञ्च गम्यते।
न खल्वन्यत्र मर्त्यानां कर्म्मभूमौ विधीयते॥"५॥
अपि च।
"चत्वारि भारते वर्षे युगान्यत्र महामुने!।
कृतं त्रेता द्वापरञ्च कलिश्चान्यत्र न क्वचित्॥१९॥
तपस्तप्यन्ति मुनयो जुह्वते चात्र यज्विनः।
दानानि चात्र दीयन्ते परलोकार्थमादरात्॥"२०॥
"अत्रापि भारतं श्रेष्ठं जम्बुद्वीपे महामुने!।
यतो हि कर्म्मभूरेषा ततोऽन्या भोगभूमयः॥२२॥
अत्र जन्म सहस्राणां सहस्रैरपि सत्तम!।
कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसञ्चयात्॥२३॥
गायन्ति देवाः किल गीतकानि
धन्यास्तु ते भारतभूमिभागे।
स्वर्गापवर्गास्पदमार्गभूते
भवन्ति भूयः पुरुषाः सुरत्वात्॥२४॥
कर्म्माण्यसङ्कल्पिततत्फलानि
संन्यस्य विष्णौ परमात्मभूते।
अवाप्य तां कर्म्म महीमनन्ते
तस्मिंल्लयं ये त्वमलाः प्रयान्ति॥२५॥
जानीम नैतत् क्व वयं विलीने
स्वर्गप्रदे कर्म्मणि देहबन्धम्।
प्राप्स्याम धन्याः खलु ते मनुष्या
ये भारते नेन्द्रियविप्रहीनाः॥"२६॥)

भारती, स्त्री, ( भृ+अतच्। स्त्रियां ङीप्।) वचनम्। ( यथा, कुमारे। ६। ७९।
"तमर्थमिव भारत्या सुतया योक्तुमर्हसि॥")
सरस्वती। ( यथा, कालिदासः।
"वीणापुस्तकरञ्जितहस्ते
भगवति भारति देवि! नमस्ते॥")
पक्षिभेदः। वृत्तिभेदः। इति मेदिनी। ते, १३८। यथा,—
"शृङ्गारे कौशिकी वीरे सात्वत्यारभटी पुनः।
रसे रौद्रे च वीभत्से वृत्तिः सर्व्वत्र भारती॥"
भारती वृत्तिस्तु भारती संस्कृतप्रायो वाग्व्यापारो नराश्रयः। इति साहित्यदर्पणस्य ६ परिच्छेदः। ब्राह्मी। इति राजनिर्घण्टः॥ ( शङ्कराचार्य्यशिष्यतोटकस्य शिष्याणामन्यतमस्य उपाधिविशेषः। यथा, प्राणतोषिण्यामवधूतप्रकरणे।
"विद्याभारेण सम्पूर्णः सर्व्वभारं परित्यजेत्।
दुःखभारं न जानाति भारती परिकीर्त्तिता॥"
नदीविशेषः। यथा, महाभारते। ३।२२१।२५।
"भारती सुप्रयोगा च कावेरी मुर्म्मुरा यथा॥")

भारद्वाजं, क्ली, अस्थि। इति हेमचन्द्रः।३।२८९॥

भारद्वाजः, पुं, ( भरद्वाजस्य अपत्यं गोत्रापत्यमिति वा। भरद्वाज+"अनृष्यानन्तर्य्ये विदादिभ्योऽञ्।" ४। १। १०४। इति अञ्।) द्रोणाचार्य्यः। ( यथा, महाभारते। ७।६। २३।
"ततः प्रयाते सहसा भरद्वाजे महारथे।
आर्त्तनादेन घोरेण वसुधा समकम्पत॥")
ऋषिभेदः। इति मेदिनी। जे, ३४॥ अगस्त्यमुनिः। इति शब्दरत्नावली॥ मङ्गलग्रहः। इति ग्रहयज्ञतत्त्वम्॥ व्याघ्राटपक्षी। बृहस्पतिपुत्रः। इति हेमचन्द्रः॥ ( देशभेदः। यथा, "कृकणपर्णाद्भारद्वाजे।" ४। २। १४५। इति सूत्रे "भारद्वाजशब्दोऽपि देशवचन एव न गोत्रशब्दः।" इति काशिका॥ भरद्वाजवंशीये, त्रि॥ यथा, महाभारते। १। १३१। ३।
"इति सञ्चिन्त्य गाङ्गेयस्तदा भरतसत्तम!।
द्रोणाय वेदविदुषे भारद्वाजाय धीमते।
पाण्डवान् कौरवांश्चैव ददौ शिष्यान्नरर्षभ!॥")

भारद्वाजी, स्त्री, वनकार्पासी। इति शब्दरत्नावली॥ ( नदीभेदः। यथा, महाभारते। ६। ९। २९।
"शोणाञ्च पिच्छिलाञ्चैव भारद्वाजीञ्च निम्नगाम्।
कौशिकीं निम्नगां शोणां बाहुदामथ चन्द्रमाम्॥")

भारयः पुं, ( भां दीप्तिं रयते प्राप्नोतीति। रय गतौ+पचाद्यच्।) भारद्वाजपक्षी। इति शब्दचन्द्रिका॥ भारद इति भाषा॥

भारयष्टिः, स्त्री, ( भारस्य यष्टिः।) भारवहनदण्डः। बाँक इति भाषा। तत्पर्य्यायः। विहङ्गिका २। इत्यमरः। २। १०। ३०॥

भारवं, क्ली, ( भारं वातीति। भार+वा+"आतोऽनुपेति।" ३। २। ३। इति कः।) धनुर्गुणः। इति त्रिकाण्डशेषः॥

भारवाहः, पुं, ( भारं वहतीति। वह्+"कर्म्मण्यण्।" ३। २। १। इत्यण्।) भारिकः। इत्यमरः। २।१०। १५॥ (यथा, महाभारते। ३। १३३। १।
"अन्धस्य पन्था वधिरस्य पन्थाः
स्त्रियाश्च पन्था भारवाहस्य पन्थाः॥")

भारवाही, स्त्री, ( भारवाह+गौरादित्वात् ङीष्।) नीली। इति राजनिर्घण्टः॥